फरवरीः २०१८
ISSN: 2347-1565
माघकृष्ण प्रतिपदा तः फाल्गुन शु० त्रयोदशी पर्यन्तम् वै. २०७४ मूल्यम् : २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम् ५ अङ्कः ७

सम्पादकः
डॉ० जीतराम भट्टः
सचिवः

ISSN : 2347-1565

मूल्यम् ₹ २५/- रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-५ फरवरी २०१८ अङ्कः-७

(माघकृष्ण प्रतिपदा तः फाल्गुन शु० त्रयोदशी पर्यन्तम् वै. २०७४)

सम्पादकः

डॉ0 जीतराम भट्टः

सचिवः

सहायक सम्पादकः

प्रद्युम्नचन्द्रः

दिल्ली संस्कृत अकादमी

(राष्ट्रिय-राजधानी-क्षेत्रम्, दिल्लीसर्वकारः)

DELHI SANSKRIT ACADEMY

(GOVT. OF N.C.T., DELHI)

**प्रकाशकः**

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२, २३६३७७९८

## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | 25 रूप्यकाणि, $2.5 |
| वार्षिकम् | : | 250 रूप्यकाणि, $25.00 |

ISSN : 2347-1565

© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

© Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (**दिल्लीसंस्कृतअकादमीपक्षे**)

Mode of payment:

Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : delhisanskritacademy@gmail.com
Website : www.sanskritacademy.delhi.gov.in

मुद्रकः

**एस.डी.एम. प्रिन्टर एण्ड पैकर**

हरिनगरम्, नव देहली-110064

मो. : 9811229529

# सम्पादकीयम्

अयि ज्ञानानुशीलनरताश्छात्रा:! अस्मिन् वयसि संस्कारा: दृढा: भवन्ति। यथोक्तञ्च- 'यन्नवे भाजने लग्न:, संस्कारो नान्यथा भवेत्।' छात्रजीवने यथा पठ्यते चिन्त्यते च तथैव मानवस्य जीवनं भवति। यद्यपि ज्ञानार्जनाय नैकेवोपाया: विविधानि संसाधनानि सन्ति प्रविधीनां माध्यमेनापि ज्ञानविज्ञानसूचनानां प्रसारो भवति। यत्र-तत्र सर्वत्रैवानायासेनापि दृश्यश्रव्यलेखा: चित्राणि च प्रसार्यन्ते तैर्माध्यमेनापि ज्ञानं भवितुं शक्नोति। दुर्लभं नास्ति ज्ञानार्जनं, किन्तु तत्रास्ति विवेकस्यावश्यकता। किमावश्यकं किञ्चानावश्यकमिति मनसि निधायैव विद्यार्थिभि: चिन्तनीयम्। अस्मिन् चिन्तने गुरव: मातापितरौ च सहायका: भवन्ति। अतएव मातृपितृगुरूणां सान्निध्येऽध्ययनं करणीयं भवति। भवन्त: भवत्यश्च पश्यन्ति शृण्वन्ति च यत् कुण्ठितेन मनसा कुत्सितं कार्यं भवति। कुण्ठिता: त एव भवन्ति ये मातृपितृगुरूणामाज्ञां न स्वीकुर्वन्ति। संस्कृते सूक्तञ्च-'मातृदेवोभव'। 'पितृदेवोभव'। 'आचार्यदेवोभव'। अत: छात्रै: जीवनोत्कर्षाय मातृपितृगुरूणामाज्ञापालनीया। आशासे पत्रिकाया अङ्कोऽयं भवद्भ्य: रुचिकर: भविष्यति।

**सुमनसां प्रतिभाप्रतिभासिका**
**क्षितितलात्तमसश्च विनाशिका।**
**शिशुकिशोरयुवप्रियसाधिका**
**विजयते भुवि संस्कृत-चन्द्रिका॥**

**निवेदक:**
**डॉ. जीतरामभट्ट:**
**सचिव:**

## अनुक्रमणिका 'संस्कृत-चन्द्रिका'-५/७


क्र.सं. | पृ.सं.

सम्पादकीयम्

डॉ0 जीतराम भट्टः

१. **वागीश्वरी विजयते**........................................१

–ओम् प्रकाश ठाकुरः

२. **परोपकारवैभवम्**........................................२

–डॉ0 धनञ्जय वासुदेवः द्विवेदी

३. **ईश्वरकृपा**........................................६

–डॉ0 रामकिशोर मिश्रः

४. **लोकोपयोगदृष्ट्या यज्ञानां महत्वम्**........................................८

–कुमारी नीरज आर्या

५. **होलीखेलनमेवं रम्यम्**........................................९

–डॉ० वेणीमाधवशास्त्री

६. **वीरबाला**........................................११

–डॉ० कैलाशनाथः द्विवेदी

७. **रासभत्वं कथं गतः?**........................................१३

–आचार्या श्यामसुन्दरः झा

८. **नाटकम् देशप्रेमी नरेद्रः**........................................१५

–पंकज कुमार झा

९. **गो सेवी परिवारः**........................................१८

–डॉ० देवी सहाय पाण्डेयः

# वागीश्वरी विजयते

- ओम् प्रकाश ठाकुरः

वीणां करे वहन्ती
श्वेताम्बरैर्लसन्ती
हंसासनं श्रयन्ती
वागीश्वरी विजयते

ब्रह्मादि देववन्द्या
मानवकुलाभिनन्द्या
वदने स्मितं धरन्ती
वागीश्वरी विजयते

ज्ञानं प्रसारयन्ती
भ्रान्तीर्निवारयन्ती
मुग्धान् दिशं दिशन्ती
वागीश्वरी विजयते

सद्भावनां भरन्ती
दुरितं निवारयन्ती
दिव्याऽऽभया स्फुरन्ती
वागीश्वरी विजयते

तन्त्रीस्वनैः सुमधुरैः
भावान् नवान् सृजन्ती
वागर्थचारुवेषा
वागीश्वरी विजयते

अपनीय या तमांसि
दीप्तानि या मनांसि
कृत्वा प्रमोदमाना
वागीश्वरी विजयते।

-डी-७५७ सरस्वती विहारः
नवदेहली

# परोपकारवैभवम्

-डॉ. धनञ्जय वासुदेवः द्विवेदी

गोपालदासः स्वगृहे सुखपूर्वकं जीवनयापनं करोति स्म। प्रकृत्या उपकारी सः सांसारिकानां कल्याणाय सदैव तत्परः। सर्वत्र गोपालदासस्य परोपकारपरायणतायां चर्चा आसीत् परन्तु गृहे स्थिताः अन्ये जनाः तस्य परोपकारवृत्तिम् अवगमनं कर्तुं असमर्थाः आसन्। कारणम्-स भूयिष्ठं कष्टं सहित्वाऽपि जनानां कल्याणं करोति स्म। अन्येषां कार्यसाधने स सदा उद्यता आसीत्। प्रमादं परित्यज्य प्रतिवेशिनां सहायताकरणं तस्य जीवनादर्शम्। यदि कस्यचित् जनस्य व्यथा तत्समक्षं आगतवती सः निश्चितरूपेण तस्य जनस्य व्यथां दूरीकर्तुं संलग्ना भवति स्म। तस्य मनसि सर्वजनकल्याणकामना आसीत्। अन्येषां सुखसमृद्धिं दृष्ट्वा सः आनन्दानुभवं करोति स्म।

एकदा तस्य परोपकारशीलस्य गोपालदासस्य व्यथिता धर्मपत्नी तं परोपकारमूर्तिं अकथयत्-वयं गृहस्थाः त्यागमूर्तयः नहि। सीमापर्यन्तं परोपकारधर्मः उचितः। सीमामतिक्रम्य परोपकरणस्य हानिरपि भविष्यति। मन्दहासेन गोपालदासः उक्तवान्- यदा मम जन्म अभवत् अहं रिक्तहस्तः एव आसम्। जन्मसमये एव मम मातुः देहावसानः अभवत्। पञ्चवर्षानन्तरं मम पिता अपि कालग्रासीभूतः अभवत्। तदा सांसारिकाः एव मम पालनं पोषणं च कृतवन्तः। अद्य अहं विपुलधनस्य स्वामी अस्मि। परन्तु तत्सर्वं धनमिश्वरस्यैव। सर्वे भूताः ईश्वरस्यांशभूताः। अतः परोपकारः एव धर्ममूलम्। स पुनः अकथयत्-परोपकारिणस्तु जनैः कृतज्ञैस्सदा प्रियन्ते स्निह्यन्ते च। युद्धविजेतृणामभिधानानि इतिहासपृष्ठलिखितान्येव वर्तन्ते परं परोपकारिणां नामानि लोहृदयेषु कृताधिष्ठानानि भवन्ति। आत्मनः परिवारजनानाञ्च मृत्युमप्यणयन् अभ्यागताय तृषितायजलं क्षुधिताय चान्नं प्रदाय तानुपकर्ता रन्तिदेवः केन श्रद्धापुरस्सरं न समर्यते? देवानामुपकाराय स्वप्राणान् विमुच्य शरीरास्थीनि प्रदाय दधीचिः कथन्न श्रद्धेयो भूतोऽस्ति ? कपोतरक्षायै स्वशरीरात् मांसमुत्कृत्य श्येनाय अर्पयिता शिविः कस्य मनसि प्राप्तश्रद्धो न वर्तते ? मृगरक्षार्थं स्वशरीरं व्याधाय समर्पयिता महात्मा बुद्धस्तु कं नतमस्तकं न करोति ? उपेक्षितानां दलितानां हरिजनानामुद्धाराय कियद्वारमुपवासदिकानामनुष्ठाता गान्धिमहोदयः कस्य नास्ति श्रद्धाभाजनम् ? परोपकारिणस्तु

लोकानां सेवामेव स्वजीवनलक्ष्यं मन्यमाना: नि:स्वार्थवृत्यैव तत्र प्रवर्तन्ते।

परोपकार: पुण्याय पापाय परपीडनम्-इति सिद्धान्ते तस्य सुदृढो विश्वास:। तस्य दृष्टौ संसारे परोपकारसदृश: कश्चित् धर्म: नास्ति। सुपात्राय जनाय स्वशक्त्यानुसारं किमपि अवश्यमेव देयम्। दानेन यदि परिवारे काचित् समस्याऽपि आयाति तथापि तत्कृते सन्ताप: न कार्य:। दानेन प्रसन्नो भूत्वाभगवान् न केवलं क्षतिपूर्तिं करोति अपितु दातु: गृहे भौतिकसुखसाधनान्यपि विस्तारयति।

एतादृशीं वार्ता श्रुत्वा तस्या: पत्न्या: मनसि क्लेश: सञ्जात:। उपदेशानां शृङ्खला तस्या: कृते भारकारि एव आसीत्। मम भर्ता मम वार्तां न श्रोसिष्यति इत्थं विचार्य सा स्वगृहकार्ये संलग्ना जाता। परन्तु मनसि द्वन्द्व: समाप्त: नाभवत्- "गृहे बहूनि कार्याणि सन्ति। बालगोपाला: सन्ति। तेषामावश्कता अप्यसङ्ख्या: । परन्तु यदा कोऽपि आगच्छति स्वसमस्यासमाधानार्थं स: स्वसर्वकार्यं परित्यज्य तस्यागन्तुकस्य समस्याया: समाधाने संलग्ना भवति। एवं प्रकारेण गृहस्थव्यवस्था कथं चलिष्यति?"

विचाराणां शृंङ्खला तस्या: मनसि जायमाना एव आसीत्, तस्मिन् समये एव गृहे घण्टिकाया: ध्वनि: अभूत्। गोपालदास: तस्मिन् काले गृहे व्यापारकार्ये व्यस्त: आसीत्। तस्य अर्धाङ्गिनी वातायनेन बहि: अपश्यत्। एक: युवा तत्र द्वारसमीपे आसीत्। मनसि शङ्का अभवत्। एष: युवा अपि सहायताप्राप्त्यर्थमेव अत्र आगतवानस्ति। सा चिन्तनं कृतवती यत् अहं वदिष्यामि- "गृहस्वामी गृहे नास्ति।" यस्मिन् समये गृहस्वामिन्या: मनसि एतादृशं विचारमागतम्, गोपालदास: उक्तवान्-"क: अस्ति ? शीघ्रं तं महानुभावं मम पार्श्वे प्रेषयतु।"

सा कपाटमुद्घाटिवती, तं महानुभावं च गोपालदासस्य पार्श्वे प्रेषितवती। रमेशनाम्ना स युवा श्यामवर्ण: दरिद्र: परन्तु अध्ययने सर्वतोभावेन रत: आसीत् । गोपालादासस्य पाश्र्वे स्थिता: स भावुक: अभवत्। कृतज्ञताया: भाव: तस्या: मुखाकृत्या: उपरि स्पष्ट: आसीत्। गोपालदासरमेशयो: मध्ये का वर्ता प्रचलिष्यति, इयं श्रोतुं सा कपाटपृष्ठे स्थिता जाता।

रमेश: अकथयत्- अहं कृतज्ञ: अस्मि। भवत: कृपाणां गणना नास्ति। भवत: कृपया अहं स्नातकोत्तीर्ण: अस्मि। अभावग्रस्ता: मम कृते भवत: सहायता अत्यन्त श्लाघनीया। सम्प्रति अहं किं करणीयं किं वा न करणीयम्-इति चिन्तयामि। जीवनयापनार्थम्

अर्थार्जन: केन प्रकारेण भवेत् इत्यपि चिन्तयामि। जीवने परोपकारस्य किं महत्त्वमस्ति इत्यपि ज्ञातुमिच्छामि।

एतच्छ्रुत्वा गोपालदास: अकथयत्-परोपकारकर्मकारणात् एव भवान् एतत् कथयति। परन्तु परोपकारस्योपरि ममाधिकार: एव नास्ति। प्रकृतिश्चेद् अवलोक्यते तर्हि सर्वत्र सततं परोपकारक्रियैव संलक्ष्यते। प्रकृत्यनुकूलमेवाचरणीयम्। भानुर्जगदिदं द्योतयति, विधुर्भुवनम् आह्लादयति, मातरिश्वा मृतप्रायेऽपि प्राणसञ्चारं विधत्ते, अनल: शैत्यादिकं वारयति भक्ष्यादिकं च पाचयति। वृक्षा: परोपकारायैव सुस्वादूनि फलानि फलन्ति, नद्य: परोपकारायैव शीतलं मधुरं जलं वहन्ति। गावस्तु परोपकारायैव मधुरं पय: दुहन्ति। वस्तुत: परस्परसद्भावनयैव स्वार्थं विहाय परार्थसाधनेन परदु:खनिवारणेन लोकोपकृतिसाधनेन सर्वजीवानुग्रहेण च भौतिकोऽभ्युदय: समासाद्यते। समाजस्य स्थितिरेव परोपकारधारा। परोपकरणं लोकानुग्रसाधनेन परदु:खनिवारणेन च सकले लोके आत्मीयत्वं साधयति। ये मानवा: परोपकारं कुर्वन्ति, ईस्वरोऽपि तेषां साहाय्यं करोति। परोपकार: सर्वेषां धर्माणां तत्त्वमेवास्ति। मानवस्य शरीरमपि परोपकारेणैव विभाति न तु चन्दनादिलेपनेन। परोपकारी जन: परोपकारं कृत्वा असीमशान्तिमनुभवन्ति। परोपकार एव महत्तमं पुण्यम्। प्राणार्पणेनापि धनधान्येनापि च परेषां हितं साधनीयम् परोपकारेण यादृशं पुण्यं सम्भवं न तादृशं यज्ञशतेनापि।

एतत् सर्वं उक्त्वा गोपालदास: युवकस्य उत्साहवर्धनमकरोत्- सम्प्रति भवान् परास्नातक:। वृत्ति प्राप्त्यर्थं प्रयासं कुरु। अथवा व्यापारकर्मणि प्रविशतु। तदनन्तरं सुखपूर्वकेन जीवनयापनं भविष्यति। यदि आवश्यकं भविष्यति तर्हि तत्रापि अहं भवत: सहायतां करिष्यामि।

रमेश: अत्यन्त भावुक: अभवत्। परन्तु पार्श्वे एका समस्या आसीत् । शीतकालस्य समय: आसीत् परन्तु पार्श्वे तूलिका कम्बल: वा नासीत्। एक: विदलितम् आच्छदकमेवासीत्। परन्तु तीक्ष्णशीतकाले आच्छादकेन कार्यं कथं चलिष्यति। अत: युवक: एकं निवेदनम् अकरोत्-हे परोपकारमूर्ति! यदि मम कृते सम्यग् आच्छादकस्य वा कम्बलस्य वा तूलिकाया: व्यवस्था भविष्यति तदैव शीतकालस्य प्रभाव: शरीरस्योपरि न्यून: भविष्यति। एकक्षणं विचिन्त्य गोपालदास: अवदत्-श्व: मध्याह्नकाले आपणे आगच्छतु। अहं भवत: कृते एकस्या: तूलिकाया: व्यवस्थां करिष्यामि।

रमेश: स्वगृहे अगच्छत् , परन्तु गोपालदासस्य पत्न्या: क्रोधस्य सीमा नासीत्। सा

शपथस्य आश्रयं गृहीत्वा उक्तवती- " आपणात् तस्य युवकस्य कृते तूलिकाया: व्यवस्था नाकरणीयम्।" गोपालदास: पत्न्या: सम्मानं करोति स्म। अत: अकथयत्- "एवमस्तु आपणात् क्रयं न भवष्यिति।" पत्नी प्रसन्नो भूत्वा तत: गतवती, परन्तु गोपालदास्य मनसि अन्यत् विचार आसीत्। निर्धारिते दिवसे स: रमेशं स्वतूलिकामेव दत्तवान्। एतत् ज्ञात्वा गोपालदासस्य पत्न्या: मनसि महान् क्लेश: अभवत्। सा मूकं भूत्वा स्वकार्यम् आरम्भं कृतवती।

कालक्रमेण रमेश: गोपालदासस्य अनवरतेन सहयोगेन स्वैकाग्रेन अध्ययनेन च भारतीयप्रशासनिकसेवाया: परीक्षायां साफल्यं प्राप्तवान्। सुखपूर्वकं जीवनयापनम् आरब्धवान्। गोपालदासस्य शिक्षामनुसृत्य स: परोपकारकर्मणि संलग्न: अभवत्।

गोपालदासस्य त्रय: पुत्रा: आसन्। सर्वे यथोचितं धनार्जनं कुर्वन्त: चकास्ते समाजे। परन्तु कालान्तरमेका भीषणा दुर्घटना जाता गोपालदासस्य ज्येष्ठपुत्रेण सह। तस्या: कृते रक्तस्य भूयिष्ठा आवश्यकता आसीत्। चिकित्सालये सम्बद्धसमूहस्य रक्त: नासीत्। गोपालदास: चिन्ताकुल: आसीत्। परन्तु तस्मिन् समये एव अनेके जना: रक्तादानार्थं तत्र आगतवन्त: रक्तादानञ्च कृतवन्त:। रक्तदानेन गोपालदासस्य पुत्रस्य प्राणरक्षणम् अभवत्। कालक्रमेण पुत्र: पूर्णरूपेण स्वस्थ: अभवत्। परन्तु अस्या: घटनाया: भूयिष्ठ: प्रभाव: गोपालदासस्य पत्न्या: उपरि अभवत्। तस्या: विचारपरिवर्तनं जातम्। अधुना सा परोपकारस्य फलं ज्ञातवती। सा चिन्तनं कृतवती- ईश्वर: परोपकारिणां कृते स्वयमेव व्यवस्था करोति। वस्तुत: परोपकारार्थमिदं शरीरं-सा चिन्तनं कृतवती। तत: परं साऽपि मनसावाचाकर्मणा परोपकार्ये रता अभवत्।

- **सहायक आचार्य:**
**संस्कृत विभाग:, राँची महाविद्यालय:,**
**राँची, झारखण्ड:-८३४००८**

# ईश्वरकृपा

-डॉ. रामकिशोर मिश्रः

ईश्वर! ते कृपा बह्वी त्वयाऽहं मनुष्यः कृतः।
दुग्धं पातुं त्वया मातुः स्तनाः पयसा पूरिताः।।

भक्षयितुं मुखं दत्तं घ्रातुं दत्ता च नासिका।
श्रोतुं दत्तौ च मे कर्णौ द्रष्टुं च दत्ते चक्षुषी।।

कार्याय च करौ दत्तौ चलितुं चरणौ तथा।
ज्ञानाय प्रदत्ता बुद्धिर्जिह्वा च भजनाय मे।।

आहाराय दत्तमन्नं गोधूमाश्चणका यवाः।
शौचस्नानक्षालनेभ्यो जलं दत्तं पानाय च।।

कीर्तनाय प्रदत्ता वाक् लेखितुं लेखनी च मे।
मेलितुं दत्तः सत्सङ्गो रमणीरमणाय च।।

भोजनाय दत्ता पत्नी पालनाय च बालकाः।
सेवायै मातापितरौ दानाय प्रभोर्मन्दिरम्।।

कर्मणे परोपकारः सदाचारश्च सन्मतिः।
ईश्वरकृपैषा सर्वा रामकिशोरवर्णिता।।

- २९५/१४ पट्टीरामपुरम्
पो.ओ.खेकड़ा-२५०१०१
जनपदम् -बागपत ( उत्तरपद्रेशः )

# लोकोपयोगदृष्ट्या यज्ञानां महत्त्वम्

**-कुमारी नीरज आर्या**

वेदा: भारतीय संस्कृते: विज्ञानस्य च मूलाधारा: सन्ति। सम्पूर्णमेव वैदिकवाङ्मयं न केवलं भारतवर्षस्य परं विश्वस्य प्राचीनतमं प्रमाणिकञ्च साहित्यायतनमस्ति। चत्वार: वेदा: तेषाञ्च शाखा, 1131 सन्ति तासु विभक्ता: विषया: त्रय: सन्ति-ज्ञानकाण्ड:, कर्मकाण्ड: उपासनाकाण्डश्च, अत्र मन्त्राणां संख्यापि-लक्ष्यं तु तासु वेदाश्चत्वार: लक्षं भारतमेव च (चरणव्यूह 5/1) लक्ष: वर्तते। अत्रापि अशीतिसहस्रा: मन्त्रा: केवलं कर्मकाण्डविषयका: सन्ति तर्हि एतत् तु स्पष्टमस्ति यत् यज्ञ एव वेदानां मुख्य विषय: वर्तते। यज्ञस्य मुख्यप्रयोजनं विश्वस्य कल्याणमस्ति एतदर्थं ऐतरेय ब्राह्मणेऽपि उक्तं यत- **''यज्ञोऽपि तस्यै जनतायै कल्पते''** (ऐत0 1/2/3) नास्ति संसारेऽस्मिन् इदृक कोऽपि पदार्थ: यं यज्ञेन प्राप्तुं न शक्यते। जन: यत्किमपि कांक्षते तदेव प्राप्नोति- **''यो यदिच्छति तस्य तत्''** (कठो ० 1/2/1/6) यज्ञस्य सृष्ट्यारम्भकालादेव सम्बन्धोऽस्ति प्रोक्तञ्च भगवता कृष्णेन-

**सहयज्ञा: प्रजा: सृष्ट्वा पुरोवाच: प्रजापति:।**
**अनेन प्रसविष्यध्वमेष वोऽर्स्विष्टकामधुक्॥**
**देवान् भावयतानेन ते देवा भावयन्तु व:।**
**परस्परं भावयन्त: श्रेय: परमवाप्स्यथ॥** (गीता० 3/10-11)

संसारस्यास्य कल्याणं यज्ञाधारितमस्ति। यज्ञेनैव संसार चक्रं प्रवर्तते। सुखस्य मूलं यज्ञमस्ति। वेदेषु स्वर्गमर्थात् सुखं यज्ञेन प्राप्यते इति निर्दिष्टं एतदेव समुद्घोषयति वेदमन्त्र:-

**''स्वर्यज्ञो नापेक्षन्त: आ द्यां रोहन्ति रोदसी।**
**यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे॥**

अत्र स्वर्गमथ तत्सुखञ्च कामायमाना ये मानवा: यज्ञेषु श्रद्धां वितेनिरे ते लेभिरे

समीप्सितं सुखम्। यज्ञविषये श्रुतिस्मृतिग्रन्थेषु एततु प्रसिद्धमस्ति यत्- **''स्वर्गकामो यजेत''**, **''अर्थकामो यजेत''**, **''पुत्र कामो यजेत''**। अस्य संसारस्य रक्षकः जीवनधारकः केन्द्र यज्ञ एव वर्तते- ''अयं यज्ञो भुवनस्य नाभिः'' (यजु० 23/62) गीतायामपि अस्यैव विस्तृतव्याख्यां कृत्वा उक्तं यत्-

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**

**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥** (गीता ० 3/14)

इतोऽपि यज्ञः रोगनाशकः, पर्यावरणशोधकः, वृष्टिकारकः, बलवर्धकः, आयुवर्धकश्च वर्तते। यजुर्वेदे एतत् स्पष्टरूपेण प्राप्यते यत् परमेष्ठिना परमेश्वरेण अस्य संसारस्य रचना यज्ञेन एव कृता।

**''यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।**

**ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्वाः सन्ति देवाः॥** (यजु ० 31/16)

तात्विकरूपेण जन्मरणबन्धनात् विमुक्तये सर्वैः यज्ञः अनुष्ठेयः। यज्ञसम्पादनाय एव मानवसमुदायः चतुर्धा विभक्तः-

**''यज्ञनिष्पत्तये सर्वमेतद् ब्रह्मचकार ह।**

**चातुर्वर्ण्यं महाभाग यज्ञसाधनमुत्तमम्॥** ( पद्मपुराण सृष्टिखण्ड 3/133)

तर्हि सर्वेषां वर्णानां, धर्माणां वा मूलं यज्ञेवास्ति। अतः एत्तु स्वतः एव सिध्यति यत् लोकोपयोगदृष्ट्या यावत् यज्ञानां महत्त्वमस्ति न तादृक् अन्यधार्मिकक्रियायाः वर्तते तर्हि सर्वैः सर्वेषां जनानां कल्याणार्थं यज्ञकर्म अश्वयमेव सम्पादनीयं।

**- गुरुकुल कांगड़ी विश्वविद्यालयः,**

**हरिद्वारम्**

# होलीखेलनमेवं रम्यम्

-डॉ. वेणीमाधवशास्त्री

आयाति च मधुमासोत्सव:
याति च मन्दं शिशिरोत्सव:
उत्सवराजो होल्युत्सव:
वर्णमयोऽयं हर्षोत्सव:

उच्चैर्नदति च कर्कशवाद्यं
अजिनस्य च तत् सततं वाद्यम्।
उच्चैर्घोषणकरणं चाद्यं
मित्रै: साकं भ्रमणं माद्यम्।।

संगीतस्य च रागो नास्ति
शास्त्रीयस्य च भागो नास्ति
यद्वातद्वा घोषणमस्ति
स्वच्छन्दस्य च पोषणमस्ति।।

वर्णमयानि जलानि पतन्ति
वर्णमयाश्चूर्णा: प्रपतन्ति।
कामस्य च पूजा: प्रचलन्ति
चेतांसि च रागैर्विचलन्ति।।

वसने पीतो वर्णरसोऽयं
पतति च शोणो वर्णरसोऽयं।
बहुवर्णानां पतिताश्चूर्णा:
देशविभागा वर्णै: पूर्णा:।।

खेदानां परिवर्तनकाल:
गीतानां सतु गायनकाल:।
यूनां तत्र च नर्तनकाल:
सर्वेषां संतोषणकाल:।।

उत्सवसौख्यं निर्गतसाम्यं
होलीखेलनमेवं रम्यम्।
बालैर्युवकै: सर्वै: काम्यं
परमसुखं यत् तस्य च गम्यम्।।

**- भामती वेन्द्रमार्गम्, साधनकेरी**
**धारवाड़:, कर्नाटक प्रदेश:**

# वीरबाला

- डॉ० कैलाशनाथः द्विवेदी

वीरबाला वीरबालेव बुद्धिमती, शक्तिशालिनी सौन्दर्ययुक्ता, सद्गुणस्वरूपा सुविख्याता चैव सर्वत्र स्वसलक्षणैरेव। सा यस्मिन्, मनोरमे ग्रामे निवसति, सः वीरभूमिबुन्देलखण्डस्याऽलंकारभूतः परमरमणीयश्चास्ति। यत्र कलकलनिनादिनी यमुनोत्तरदिक्पार्श्वे प्रवहति प्राणिनां चेतांस्याह्लादयति च । चारुनिर्झरनिनादितविचित्रभूखण्डानां प्राकृतिकसुषमया, नयनाभिरामनद्यास्तटवर्तीसघनवनानां शस्यश्यामलहरितक्षेत्राणामङ्के विलसितवीरवालायाः ग्रामस्याऽलौकिक शोभा सर्वैः संलक्ष्यते एव।

यथाऽस्माकं विशालदेशे भारतवर्षे वीरभूमेः राजस्थानस्यरत्नसिंहराणासांगाप्रतापादिन-सिंहैर्गौरवं वर्धते, तथैवाऽऽल्हा-ऊदल-छत्रसालहरदौलादिवीरवरैर्लक्ष्मीबाईसारन्धाझलकारी सुन्दरमुन्दरादिवीराङ्गनाभिर्बुन्देलखण्डस्यापि गौरवमतिरिच्यतेऽस्मिन् लोके। वीरबालायै पूर्ववर्तिन्यो विख्यातवीराङ्गना एव परमादर्शभूताः संजाताः। सा सततं चिन्तयति चारुचरित्ररक्षणेन सह स्वदेशयशोवर्धनम्। सा स्वमातृपितृपतिकुलकीर्तिसंवर्धनार्थं स्वधर्मपालन सदैव सावधाना श्रममेवाऽऽश्रयति सततम्।

वीरबालायाः गौरवशालिग्रामस्य प्राचीनाभिधानमर्कवनं सम्प्रति सर्वैरकौनेत्य-भिधीयते। अस्मिन् प्रसिद्धग्रामेऽधिसंख्यनिवासिनो निषादधीवरादयः सन्ति किन्तु पार्श्ववर्तिग्रामेषु केचित् कंजरवनेचरादिजनजातयोऽपि निवसन्ति। काननचारिणामेषां कंजरजनानामाजीविकाऽनियतैव वर्तते। कृषिकार्यमकृत्वा, कुन्तमिव खनित्रं सन्धार्य वनात्, वनं भ्रमित्वा क्वचिन्मधु, क्वचिद्वन्यौषधीर्नीत्वा, क्वचिच्च नानाप्रकाररज्जूपकरणान्यादाय समायान्त्येय समीपवर्तिग्रामक्षेत्रम्।

सामान्यतः सर्वेषां जनानां जीवननिर्वाहार्थमाजीविका भवति परिश्रममूला, किन्तु भोजनवस्त्राऽऽवासव्यव्यवस्थायै यदा-कदा केचित् कुत्सितचित्तवृत्तिमयकंजराः चौर्यहत्याऽपहरणलुण्ठनाद्यपराधकार्येषु निरताः लक्ष्यन्ते। शासकीयारक्षिणः सामान्यतयोदासीनाः पराङ्मुखा इव भवन्त्यमीषामापराधिकगतिविधीः प्रति।

वीरबालायाः परमप्रतापी पतिः वीरपालोऽकौना ग्रामस्य जनप्रियप्रधानोऽस्ति। अस्य किशोरपुत्रः वीरसेनो न केवलं स्वपरिवारस्याऽपितु सर्वेषां ग्रामवासिनां चन्द्र इव नयनानन्ददायकः प्रेमपात्रश्चास्ति। सुवीरो वीरपालः श्रमेण सततं वैज्ञानिकविधिनैव

स्वकृषिकार्यं सम्पादयति वीरबालाप्रेरणयां अत एव सुख सम्पत्तिरपि शीघ्रमेव संलक्षिताऽनयोर्गृहे। ग्रामे क्षेत्रे चाऽनयो: प्रभूतप्रभावोऽपि परिवर्धित:।

ग्रामप्रधानवीरपालस्य शस्यसमृद्धं खलान्नक्षेत्रं यदा-कदा ग्रामसमीपवर्तिन: कंजरा: समायान्ति धान्ययाचनार्थं तदा वीरबालाऽत्यन्तमुदारतापूर्वकं पत्या दापयति धान्यमेभ्य:। यदाऽमी ग्रामे संलक्षित:। मधुरज्जूपकरणविक्रयन्त: तदाऽपि सोदारतया क्रीणाति एषामुपयोगिसमग्रीमन्यैश्चापि क्रापयति। कृषिकार्येऽपि स्वपतिं कथयित्वा कंजरै: कार्यं कारयति समुचितमेभ्य: पारिश्रमिकं च दापयति।

गृहकर्मकुशला वीरबाला गृहकार्यणि सम्पाद्य सामान्यत: स्नानार्थं पतितपावनीं यमुनां प्रति प्रतिदिनं गच्छति। एकस्मिन् दिने यदा परमसुन्दरी बीरबाला निर्मलकालिन्दीजलेऽप्सरेव निमज्जिता स्नानरताऽऽसीत्, कुम्भानामा कश्चित् कंजरयुवकोऽपि तत्र कलिन्दकन्यातटं निर्जनंनिरीक्ष्य समायात: समीपमेव। स्नाननिरतवीरबालाया: विमलान्यनावृत्तान्यनवद्यांगान्यवलोक्य चित्रलिखित इव कुन्तधारी कुम्भा निस्तब्धो जात:! वीरबालाया: स्वर्णाभूषणानामप्रतिमकान्त्या कुम्भा न तथाऽऽकृष्टोऽभवत् यथा तस्या: वीरबलाया: शरीरस्याद्भुतसौन्दर्यकान्त्या।

स्नाननिरता सुन्दरी वीरबाला यदा यमुनातटे स्वसमीपे चित्रांकितमिवातिधृष्टं कंजरयुवकमवलोकयन्तं दृष्टवती, तदा तारस्वरेण तं निर्भत्स्र्य एवमुक्तवती ''रे कंजरकुलकलंक! अत्र निर्जने स्त्रीस्नानघट्टे त्वं किं समायातोऽसि? अपसर इतोऽतिशीघ्रमेव, अन्यथा....''रे शठ, स्मर स्वपरिवारमिष्टदेवं च! क्षिप्रमेव त्वां पापिनं कुलकलंकं यमलोकं प्रापयामि। तव निष्प्राणकुत्सितकाया निर्मलयमुनाजलधारायां प्रवहिष्यति।''

कंजरयुवा कुंभा कण्ठगतप्राणानाहरन्तीं साक्षात् महिषमर्दिनी-दुर्गामिव करालां वीरबालामवलोक्य स्वकण्ठमोचनेऽसमर्थं प्राप्याऽतिदीनतया स्वशिथिलकरौ बद्ध्वाऽपराधक्षमार्थं प्रार्थितवान् पुन: पुन:। भविष्ये कदाप्येवमपराधं नैवाचरिष्यति स: इति प्रतिश्रुत्य वीरबालादयाविमुक्त: कुंभा पुनर्जीवनमिव प्राप्य पलायितवान् निर्जनयमुनातटादतिलज्जया।

अपावनमिव कंजरकिशोरं प्राणदानेन पुण्यलाभमिवाऽनुभवन्ती वीरबाला पुनर्यमुनानीरेण स्वशरीरं पावयन्ती वस्त्राणि धारयन्ती धीरगत्या निर्भीकतया स्वगृहमागत्य स्नानघटितं सर्वं वृत्तांन्तं स्वपतिं वीरपालमेव निवेदितवती।

-क्रमश:-

**कुसुम कुलाय,**
**अजीतमल ( औरैया ), उत्तर प्रदेश:**

# रासभत्वं कथं गतः?

-आचार्य श्यामसुन्दरः झा

रासभेश! नमस्तुभ्यं महायोगीश्वरो भवान्।
सदा मौनी सदा शान्तः हर्षामर्षविविर्जित।।१।।
घासम् अत्सि बुसम् अत्सि शुष्कं वा हरितं क्वचित्।
दैवयोगेन यत्प्राप्तं तस्मात् तृप्यसि रासभ!।।
लुगुडैस्ताड्यमानोऽपि विकृतिं नैव गच्छसि।
कृतापमानो लोकेऽस्मिन् विकृतिं मानवो यथा।।
शाद्वलं क्षेत्रमालोक्य प्रसीदतितरां मनः।
'ढेंचू-ढेंचू' इति क्रन्दन् कूर्दसे धावसि क्षितौ।।
त्वां तथाविधमालोक्य द्विलत्ताक्षेपणं तथा।
विषण्णमपि मे स्वान्तं प्रसादम् अधिगच्छति।।
श्रावणे घासमालोक्य क्षीणतामुपयासि रे!
वैशाखे मोदमायासि अतः वैशाखनन्दनः।।
मूर्खतायां प्रसिद्धोऽसि मूर्खत्वं तव भूषणम्।
भूषणं चेद् जहासि त्वम् का शोभा तव कथ्यताम्।।
यो हि यस्य अंलकारः शोभते तेन एव सः।
अंलकारो न त्यक्तव्यः एषा बुद्धिमतां मतिः।।
यस्मिन् जने मूर्खता स्यात् स तु त्वादृश एव हि।
संसारेऽपि प्रसिद्धः स्यात् गर्दभो रासभः इति।।
रासभो न भवेल्लोके वेसरं कथमाप्नुयुः।
यं विना गिरियात्रा स्यात् कदाचित् सुलभा नहि।।
गर्दभाः स्युर्न लोकेऽस्मिन् एषोक्तिः सर्वथा वृथा।
उष्ट्राणां तु विवाहोऽस्ति गर्दभाः गीतगायकाः।।
गर्दभो गर्दभो नास्ति उपाधिरेष कीर्तितः।

यस्मै तु रोचते एष तेनैश प्रतिगृह्यताम्।।
उपाधिरेषः लोकेऽस्मिन् निःशुल्कं प्रतिदीयते।
आगच्छन्तु महाभागाः लुण्ठ्यतां लुण्ठ्यतां द्रुतम्।।
आनक्तन्दिवमालोक्य अविश्रान्तं तपस्विनम्।
तिष्ठन्तं च तपः पूतं पृच्छा मे हृदि जायते।।
महागुणान्वितो भूत्वा रासभत्वं कथं गतः।
इति मे संशयं श्रीमन् समाधत्स्व मनः स्थितम्।।
गर्दभः प्रत्युवाचेदं कृत्यं पूर्वजनौ कृतम्।
संस्मरन् संस्मरन् सर्वं लज्जमानः अधोमुखः।।
पूर्वजन्मनि नेताऽऽसं बाहुबलीति विश्रुतः।
मिथ्या पीडयतो दीनान् गतं मे सर्वजीवनम्।।
सोऽहमेकेन विप्रेण बोधितोऽपि पुनः पुनः।
न श्रद्दधे स्म तद्वाक्यं स्वबाहुबलदर्पितः।।
भ्रष्टाचारी दुराचारी स्वच्छन्दोऽहमसंस्कृतः।
दीनानामभिशापेन रासभत्वमुपागतः।।
हर्षेणातिगर्वेण भूयोऽपि प्रत्युवाच सः।
'ढेंचू ढेंचू' इति क्रन्दन् द्विलत्ताक्षेपमाचरन्।।
पुराहं रासलीलायां रासे स्म नृत्यमाचरन्।
अतोऽहं रासभो जातः रासे भाति स रासभः।।
रासभेन्द्रसमाख्यातं रासभाख्यानमद्भुतम्।
आकर्ण्य स्वानि धामानि जग्मुस्ते मुनयः समे।।


- **वरिष्ठाचार्यः**

**श्रीमुक्तानन्द-संस्कृत-महाविद्यालयः**
**शान्ति मन्दिम्, मगोद महाफलिया,**
**बलसाडम्, गुजरात प्रदेशः-३९६०२०**

# देशप्रेमी नरेन्द्रः

**-पंकज कुमार झा**

पात्राणि-मनः, देवः, नरेन्द्रः, मित्राणि, धनिकः, वणिक्, स्वामिजीवः, द्वारपालः, राजामंगलसिंहः, अमात्यश्च

**॥ अथ प्रथमं दृश्यम्॥**

(एकस्मिन् दिने-मनः समाधेः मार्गाज्जयोतिर्मयपथोपरि उन्नतः सन् चन्द्रसूर्यनक्षत्रयुक्तस्थूलजगतः सहजभावमतिक्रम्य प्रथमं सूक्ष्मभावे प्रविष्टोऽभूत्। तदा मनः प्रवशिति।)

**मनः**- स्वकीयस्वभावात् चंचलः सन् इतस्ततः भ्रमति। (ततः एकः देवः आगच्छति)

देवः- अरे मनः! त्वम् इतस्ततः कथमटति?

**मनः**- देव! मम तु स्वभाव एषः तथा चात्र ज्योतिर्मयपथि अनेकदेवतां दर्शं-दर्शमहं विरक्तोऽभवम्। अहं कंचन विशेषांशं द्रष्टुमिच्छामि।

**देवः**- अयि भोः! विशेषदर्शनार्थं तु विशेषश्रमः अपेक्षते नु, अथ च विशेषपरिश्रमेण विशेषश्रान्तः अपि भवष्यिसि। कथमेषः परिश्रमः क्रियते।

**मनः**- देव! भविष्ये किं भविष्यतीति जिज्ञासेऽहम्। अथ च इदानीं मम भारतदेशस्य दशा अति दयनीया वर्त्तते। तस्योद्धाराय कोऽपि अग्रे आगमिष्येति न वेति इत्यपि मम विशिष्टेहा।

**देवः**- हूँ...(श्वासं निष्क्रम्य) एतस्य कृते तु अस्य सीम्नः पारं गन्तुं भविष्यति।

**मनः**- (हस्तारविन्दे संयोज्य) हे देव! किं ममास्य सीम्नः पारगमने सहायतां करिष्यति, एवं चेदहं भवतः उपकारं कदापि न विस्मरिष्यामि। (एवमुक्त्वा देवं स्तौति)

**नास्ति पाद्यं न वार्घ्यं न वा विष्टरं**
**नापि नैवेद्यजातं किमप्यालये।**
**भक्तिभावैरतुल्यैस्तथापि प्रभो!**
**व्याहरामि प्रभुं वंदनं वंदनम्॥**

**देवः**- (इदं श्रुत्वा देवः प्रसन्नतामेति प्रसन्नमुद्रया) अहं प्रसन्नोऽस्मि। वद किमिच्छसि? यत् किमपि देयं वस्त्वस्ति तद्वद। अहं ते दातुमिच्छामि।

**मनः**- देव! अखण्डभेदरहितं समरसभावपूर्णं ज्योतिर्मण्डलस्य कमपि एवमंशं प्रदर्शय,

यस्मान्मम भारतदेशस्योद्धारो भवेत्।

**देवः**- (इदमाकर्ण्य) अलम् एवमेव। (मनसः हस्तं धृत्वा तं प्रदर्शयति एकमद्भुतमंशम्)मनः पश्यति एकं विशिष्टज्योतिपुंजं यः पुंजः दर्शन्-दर्शनेव शिशुः रूपे परिणतोऽभवत् सः दिव्य-शिशुः एकस्मिन् ऋष्यंके उपविष्टः आसीत् तथा च सः दिव्यशिशुः ऋषिं प्रति वक्ति-अहं गच्छामि त्वयापि आगन्तव्यम्। इति श्रुत्वा सः ऋषिः मन्दस्मितेन स्व स्वीकृतिं तस्मै ददाति।

**॥ अथ द्वितीयं दृश्यम्॥**

(एतदनन्तरं सोज्ज्वलाज्योतिः विलोममार्गादस्मिन् धराधाम्नि श्रीनरेन्द्ररूपे परिणतो भूत्वा आगच्छत्) (एकस्मिन् स्थाने श्रीनरेन्द्रः तस्य मित्राणि च)

**मित्राणि**- अरे नरेन्द्र! आगच्छ अस्माभिर्सह क्रीड। (नरेन्द्रः स्व बालचापल्यान्मित्राणां चतुर्दिक्षु धावति)

**मित्राणि**- (परस्परमालापयन्) त्यजतु तं वयं क्रीडामः। ( मित्राणि एकस्मिन् स्थले गृहं सम्पादयन्ति। अपरस्मिन् स्थले बालूकया मृदया वा लड्डूकान् उत्पादयन्ति। एवं प्रकारेण सर्वे स्व-स्व कार्ये व्यस्ता अभवन् तदानीमेव नरेन्द्रः।)

**नरेन्द्रः**- (एकस्मात् स्थलादागत्य) ओ हो!भवन्तः गृहं सम्पादयन्ति किम् ? अपसर इतः-अहं भवतां गृहं पश्यामि। (एवं कृत्वा गृहं नाशयति। पुनः नरेन्द्रः)

**नरेन्द्रः**- (अपरं स्थलमागत्य) आ हा हा! भवन्तः लड्डूकान् निर्मान्ति बहु शोभनम्-शोभनम् किंचिदपसर भोः! अहं भवतां लड्डूकान् पश्यामि भवतां लड्डूकं समवृत्तं वर्त्तते न वा ? (एवं कृत्वा लड्डूकाः तेन चूर्णीकृताः तथा च लड्डूकं नीत्वा ततः धावति) (सर्वाणि मित्राणि तस्य पृष्टे धावन्तः वदन्ति)

**मित्राणि**- अरे अरे पश्य! नरेन्द्रः लड्डूकान् नीत्वा धावन्नस्ति। तं धर तं धर। (अपरः कथयति) अरे! अनेन मम गृहं त्रोटितं। एतं मा त्यज, मा त्यज..............(परन्तु नरेन्द्रः कस्यचिदपि हस्ते नागच्छति तदानीमेकमपरं मित्रं प्रविशति वदति च)

मित्रं -मित्रवर्याः! एषः एवं हस्ते नागच्छति। बहु चपलः असौ एतस्माद् भवद्भिर्जलस्य व्यवस्था करणीया। (मित्राणि पृच्छन्ति)

**मित्राणि**- अयि भोः! अनेन जलेन किं भविष्यति। (तदानीं मित्रं वदति)

**मित्रं** - हे वयस्याः! प्रथमं जलं तु आनयन्तु तावदहं दर्शयामि यत्तेन किं भविष्यतीति। (तेष्वेकं मित्रं जलमानयति तदानीं पुनः मित्रं वदति)

**मित्रं**- श्रृणोतु-सर्वो पृष्ठतः तं धृत्वा रक्षन्तु । अहं तस्य मस्तके इदं जलं दास्यामि।

यावदहम् एतज्जलं तस्य मस्तके दास्यामि तावत् सर्वे "शिव शिव" इति जपनीयं शोभनम्। (सर्वे सुहृदः नरेन्द्रं पृष्ठतः धृत्वा जलाभिषेकं कुर्वन्ति-तदा सर्वे शिव शिव इति आलपन्ति)

## ॥ अथ तृतीयं दृश्यम्॥

(शनैः शनैः नरेन्द्रः संगीतशिक्षायामपि पारंगतोऽभवत् एकस्मिन् दिने नरेन्द्रः तस्य मित्राणि च)

**मित्राणि**- नरेन्द्र! त्वं प्रौढो भूत्वा किं करिष्यसि?

नरेन्द्रः- अहं किंचिदपि न जाने परन्तु अहं अग्रे गत्वा उष्णीषं (पगडी) नूनं धारयिष्यामि तथा च भारतस्य कृते यत्किंचिदपि कर्त्तुं शक्ष्यामि तत्सर्वं करिष्यामि। अहमेतस्य कृते एकं गीतं रचितवानस्मि। तद्गीतं श्रोष्यन्ति भवन्तः।

**मित्राणि**- नूनं भोः! नूनं भवतां गीतं भवतां वादनं तु नूनं श्रोतुमिच्छामो वयम्। श्रावयन्तु-श्रावयन्त(नरेन्द्रः तस्य मित्राणि च सर्वे वाद्ययंत्रादिकेन सह गीतं श्रावयन्ति)

### भारत-गीतिका

भारतशुभं रचयाम्यहं नवकल्पसूक्तसमसन्वितम्।
राराजते यत्राधुना विज्ञानज्ञानासुभाषितम्॥
भारतशुभं रचयाम्यहं..............................

१. श्यमलसुधा धरणीतले वासयामि नव-नव जीवनं।
माधुर्य सरसमुदावने सुरगणसतादिसज्जितम्॥
भारतशुभं रचयाम्यहं..............................

२. भविता हि वाग्विवर्द्धनं सुजनैश्च शास्त्ररक्षणम्।
सममैत्रीभावसुदर्शनं करिष्यामि भारतसंस्कृतम्॥
भारतशुभं रचयाम्यहं..............................

३. स्थानं सुधाप्लावितमहो! गौतमादि ऋषिभिर्पूजितम्।
भारतमहं तत्कल्पये येन भाति पंके पंकजम्॥
भारतशुभं रचयाम्यहं..............................

**-शेष क्रमशः-**

**-नीरा-सदनम्**
**आर.एल.सर्राफ.मार्गः**
**बी. देवघरः, झारखण्डम्-८१४११२**

# गो सेवी परिवारः

-डॉ० देवी सहाय पाण्डेयः

धन्यो गोसेवी परिवारः।
यत्र मन्यते माता धेनुः सेवाया विस्तारः।
गुणकरमस्याः पयः प्रशस्त कुरुते बल संचारम्।
गोः मूत्रमपि परं शोधकं हरति कुरोग विकारम्।
गवि वसन्ति देवताः समस्ताः श्रुतिसम्मतसुविचारः।
कृषिप्रधाने भारतदेशे गोसेवको सुखसारः।
लेभे रघुतल्यं वरपुत्रं गोसेवको दिलीपः।
गोपालोऽभूत गोसेवायै श्रीकृष्णो यदुदीपः।
गोसेवां शिक्षयति लोकं कृष्णदिकावतारः।
धन्यो गोसेवी परिवारः।।

- लवकुशनगर कालोनी, रामघाटम्
अयोध्या, जिला-फैजाबादः
उत्तरप्रदेशः-२२४१२३

# "संस्कृत मंजरी"

एक साहित्यिक त्रैमासिक पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# "संस्कृत मंजरी"

( आई.एस.एस.एन.-२२७८ -८३६० )

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवेदनाओं, शोध निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है ।

**मूल्य : - एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु.१००/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत मंजरी"

**के स्थायी अध्येता बनें ।**

आज ही अपना वार्षिक सदस्यता शुल्क नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट द्वारा दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें । शुल्क मल्टी सिटी चैक द्वारा स्वीकार्य होगा।

पत्र व्यवहार का पता--

**सचिव/सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

**प्लाट सं. ५, झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.-०११-२३६३५५९२, २३६८१८३५**

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

## ''संस्कृत-चन्द्रिका''

नैतिक मूल्यों के साथ-साथ

सम्पूर्ण देश के बाल-साहित्यकारों तथा नवोदित प्रतिभाओं

की लेखनी की संयुक्त प्रस्तुति

## ''संस्कृत-चन्द्रिका''

( आई.एस.एस.एन.-२३४७-१५६५ )

संस्कृत भाषा के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की बाल मासिक पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

**मूल्य : - एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु.२५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

## ''संस्कृत-चन्द्रिका''

**के स्थायी अध्येता बनें ।**

आज ही अपना वार्षिक सदस्यता शुल्क नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट द्वारा सचिव, दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें । शुल्क मल्टी सिटी चैक द्वारा स्वीकार्य होगा।

पत्र व्यवहार का पता--

**सचिव/सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

**प्लाट सं. ५, झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.-०११-२३६३५५९२, २३६८१८३५**

RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वाामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।